र्षादूर्ध्वं क्षार्थशौचमाचरेदिति स्मृतेः ॥ कामाचारादिकेप्येवं ॥ उनैकादशवर्षस्य पंचवर्षात्परस्य च ॥
चरेद्गुरुस्तु हृत्स्थैव प्रायश्चित्तं विशुद्धये ॥ अतो बालतरस्यापि नापराधेन पातकमिति स्मृतेरि
ति दत्तः ॥ स्मृत्यर्थसारेप्येवं ॥ अथोपनयनं ॥ आश्वलायनः ॥ गर्भाष्टमेष्टमे वाब्दे पंचमे सप्तमेपि वा ॥ द्विज
त्वं प्राप्नुयाद्विप्रो वर्षे त्वेकादशे नृपः ॥ मनुः ॥ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे ॥ राज्ञो बलार्थिनः
षष्ठे वैश्यस्यार्थार्थिनोष्टमे ॥ विष्णुः ॥ षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे ॥ अष्टमे सर्वकामस्य

नवमे कांतिमिच्छतः ॥ आपस्तंबः ॥ गर्भाष्टमेषु ब्राह्मणमुपनयीत बहुवचनं गर्भषष्ठसप्तमयोः प्राप्त्य
र्थमिति सुदर्शनभाष्ये ॥ केचित्तु विप्रस्य षष्ठं न मन्यते ॥ आपस्तंबः ॥ अथ काम्यानि सप्तमे ब्रह्मवर्च
सकाममष्टमे आयुःकामं नवमे तेजस्कामं दशमे न्नाद्यकाममेकादशे इंद्रियकामं द्वादशे पशुकाममु
पनयेत् ॥ गौणकालमाह मनुः ॥ आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते ॥ आद्वाविंशात्क्षत्रबं
धोरा चतुर्विंशतेर्विश इति ॥ ज्योतिर्निबंधे ॥ अग्रजा बहुजा वैश्याः स्वावधेरूर्ध्वमब्दतः ॥ अनु
पनयनाः सर्वे वृषला एव ते स्मृताः ॥ अत्र मौंजाजिनोपवीतादिविशेषः ॥ पराशरमाधवीये स्मृत्य
र्थसारे च ज्ञेयः ॥ गार्ग्यः ॥ विप्रं वसंते क्षितिपं निदाघे वैश्यं घनांते व्रतिनं विदध्यात् ॥ माघादिषु क्रांति
क पंचमासाः साधारणा वा सकलद्विजानां ॥ ज्योतिर्निबंधे ॥ माघादिषु च मासेषु मौंजी पंचसु श
स्यते कालादर्शे ॥ वृद्धगार्ग्यः ॥ माघादिमासषट्केतु मेखलाबंधनं मतं ॥ उपाकरणमंत्रं च श्रावणा
दौ विसर्जयेत् ॥ मैत्रेयसूत्रेऽपि ॥ वसंतो ग्रीष्मः शरदित्यृतवो वर्णानुपूर्व्येण माघादिषण्मासपक्षे सर्वव
र्णानां नेतुरुदगयनमेव नयो बलमिति ॥ अन्ये तु दंतहानात्र वसंते नोत्तरायणस्य संकोच श्राद्धदर्शि
स्याग्रहणे विधिनैवाधाने वसंतादेरिति काल दिने वसायं प्रातर्विधिना यावज्जाविधि धेरिवेत्युक्तं ॥
आचार्ययोगः ॥ परस्परव्यभिचारान्नियमः ॥ उत्सेनिमि त्तेसांगकर्मोक्तेः कालापेक्षा इत्युत्तरायणं वि
वसंतस्य भावान्नियमः ॥ नवाम्नितत्व ॥ नचैवं कृष्णीतरतिवदचुत्सानुवाद ॥ तदद्राकेभेदापरिहारात् ॥
उत्तरायणविधिवैयर्थ्यं तत्तु वासायमितिमाया ॥ श्रीगिरं च मांपंचाना एवषट्पारिजाते ॥ बृहस्पतिः ॥
सप्तचापकुलिरस्थो जीवोप्यशुभगोचरः ॥ अतिशोभनतां दध्याद्विवाहोपनयनादिषु ॥ इति शार्ते ॥

नजन्मधिष्ण्येनच जन्ममासे जन्मकालायदिनेविदध्यात्॥ ज्येष्ठेनमासिप्रथर्मस्यसूनोस्तथाखुलायां
अपिमंगलानि॥ राजमार्तंड॥ जातंदिनंदूषयतेवसिष्ठोह्यष्टौगर्गोनियतंदशात्रिः॥ जातस्य
पक्षंकिलभागुरस्त्वशेषाःप्रशस्ताःखलुजन्ममासि॥ जन्ममासोतिथौभेचविपरतदव्देसति॥
कार्यमंगलमित्याहुः॥ गर्गभार्गवशौनकाः॥ जन्ममासनिषेधोपिदिनानिदशवर्जयेत्॥ आ
रभ्यजन्मदिनसाधुभास्तुगत्तिथयोपरे॥ ग्रंथांतरे॥ व्रतेजन्मत्रिकारिस्थोजावेपिष्ठोर्चनात्सकृत्॥
शुभोतिकालेचाष्टव्ययस्थोद्विगुणार्चनात्॥ शुद्धिनैर्गुरोर्यस्यवर्षेप्राप्तेष्टमेयदि॥ चैत्रेमीन
गतेभानौतस्योपनयनंशुभं॥ जन्मभादष्टमेसिंहेनीचेवाशत्रुभेगुरौ॥ मीनेनीबधः शुभः प्रोक्तः
चैत्रेमीनगतेरवौ॥ गुरुविज्ञ्रुसेनारदः॥ बाल्येस्यबव्हानोपिशांहा जावोबल्बप्रदः॥ य
थोक्तवत्सरेकार्यमनुक्तेचोपनायनं॥ शांतिश्चायेवक्ष्यते ज्योतिर्निबंधे रत्नसिंहः॥ त्ला यांपंच
माषष्ठीद्वितीयापिचसप्तमी॥ उभयोःपक्षयैश्चैवविशेषणसुपूजितः॥ धर्मकामोसितेपक्षे
नैमित्ति
कैश्चप्रथमास्तथा॥ शुक्लत्रयोदशीकेचिरछंतिचोपनयस्तथा॥ श्रीउशनोदेवसिष्ठः॥ नैमित्ति
कैश्चप्रथमास्तथा॥ शुक्लत्रयोदशीकेचिरछंतिचोपनयस्तथा॥ प्रशस्तप्रतिपत्कृष्णेनक
कमनध्यायंरुच्छेचप्रतिपद्दिनं॥ मेखलाबंधनेशस्तंचोलेवेदव्रतेष्वपि॥ प्रशस्तात्प्रतिपत्कृष्णेकदाचिच्छुभ
चापरस्मृता॥ एतदलालकावस्याप्तस्यबटोरुपनयनविषयं॥ प्रशस्तात्प्रतिपत्कृष्णेकदाचिच्छुभ
गेविधौ॥ चंद्रबलशुभेलग्नेवर्षाणामितिलघिनं॥ इति व्यासोक्तेरित्याहुः॥ एवंसम
॥ न्यपितस्यमंगलगृहहोत्ते॥ बृहस्पतिः॥ शुक्लपक्षेशुभःप्रोक्तःकृष्णेचांत्यत्रिकंविना॥
तथा॥ मिथुनेसंस्थितोभानौज्येष्ठमासेनदोषकृत्॥ मदनरत्नेनारदः॥ विनर्तुनावसंतेन

कृष्णपक्षे गलग्रहे ॥ अपराह्णे चोपनीतः पुनः संस्कारमर्हति ॥ वसंते गलग्रहो न दोष इत्यर्थः ॥ तत्र
तत्रैव नारदः ॥ अपराह्णे स्त्रे धाविसक्तदिनत्रितयं श्राद्धस्य चैव ॥ कृष्णपक्षे चतुर्थ्यादि सप्तम्यादिनत्रयं ॥ अन
त्रयोदशीचतुष्कं च अष्टावेते गलग्रहाः ॥ वसिष्ठः ॥ पापांशकगते चंद्रे अरिनीचास्थिते पि च ॥ अन
ध्याये चोपनीतः पुनः संस्कारमर्हति ॥ अनध्यायस्य पूर्वेद्युः सत्वस्यैव ह्यपरेहनि ॥ व्रतबंधं न
सर्गे च विद्यारंभं न कारयेत् ॥ राजमार्तंडः ॥ आरंभानंतरं यत्र प्रस्तारः सोन सिध्यति ॥ गर्गादि
मुनयः सर्वे तमेवाहुर्गलग्रहं ॥ ज्योतिर्निबंधे व्यासः ॥ अष्टकासु च सर्वासु युगमन्वंतरादिषु ॥
अनध्यायं प्रकुर्वीत तथा सोपपदास्वपि ॥ सोपपदास्तु स्मृत्यर्थसारे ॥ सिता ज्येष्ठे द्वितीया च
आश्विने दशमी सिता ॥ चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः ॥ एवं प्रदोषदिनं वर्ज्यं ॥
प्रदोषस्य रूपमाह गोभिलः ॥ षष्ठी च द्वादशी चैव अर्द्धरात्रोननाडिका ॥ प्रदोषमिहकु
र्वंतत्तृतीयान्नवयामिका ॥ ज्योतिर्निबंधे व्यासः ॥ यश्चैत्रवैशाखसितात्तृतीया माघस्य स
प्तम्यथ फाल्गुनस्य ॥ कृष्णे द्वितीयोपनये प्रशस्ताः प्रोक्ता भरद्वाजमुनींद्रमुख्यैः ॥ अत्रापि र
थप्रतिपत्तेयं ॥ यजुर्ब्रह्मकार्ग्यः ॥ अनध्याये पि कुर्वीत यस्तु नैमित्तिको भवेत् ॥ सप्तमी मा
घशुक्ले तु द्वितीयाच्चाक्षया तिथिः ॥ बुधत्रयेंदुवाराश्च शस्ता निव्रतबंधने इति ॥ यत्तु प्रायश्चि
त्तनिमित्ते नार्थोपनयनविषयं ॥ स्वाध्यायविरुजो ध्रुवाः कृष्णप्रतिपदादयः ॥ प्रायश्चित्तनिमित्ते
तु मेखलाबंधनं मतं ॥ इति तैत्तिरीयोक्तेरिति निर्णयामृतकालादर्शौ ॥ यद्यप्यतो प्रेत पूर्व
स्योक्ता अनिरुक्तं परिधानं कालम्ब्येस्मात्सलायनेन पुनरुपनयने कालानियमउक्तस्य

स्तथापि निमित्तान्तरमेव सः ॥ तदाना करणे तु सर्वोक्तकालो ज्ञेयः ॥ प्रतिवेदमुपनयने शाख
नियमः स्मृतिचन्द्रिकोक्तः ॥ गर्गः ॥ ग्रहे रविंदोर विनिप्रकंपे केतुद्गमोल्कापतनादिदोषे ॥ अनेद शाल
निवर्दन्ति स्या अयोदशाहानि वदन्ति केचित् ॥ संस्कृटेनु चंद्रेश्वरः ॥ दाहे दिशां चैव धराप्रकंपे
वज्रप्रपात यविदारणे च ॥ केनेन थोक्तं प्रकृते प्रपाते ध्यंहं नकुर्याद्व्रतमंगलानि ॥ तत्रैव ॥
वेद्यतोपनयने स्वाध्यायाध्ययने तथा ॥ नदोषो युक्तुषां सो पियदा स्वाध्यायने पि च ॥ हेमाद्रौ
ज्योतिषे ॥ हस्तत्रये पुष्यधनिष्ठयोश्वपौष्णाश्विसौम्यादितिविष्णुमेषु ॥ शस्ते तिथौ चंद्रबले
प्रयुक्तकार्यो द्विजानां व्रतबंधमोक्षौ ॥ ज्योतिर्निबंधे नारदः ॥ ज्येष्ठान्त्यवर्गेष्ट याह्मजं चंद्रादिस
त्तराणि च ॥ विष्णुत्रयाश्विमित्रजयोनिभाः स्युपनयने ॥ बृहस्पतिः ॥ विष्णुत्रेरेषु रोहिण्यां ह
स्ते मैत्रे च वासवे ॥ शस्ते सौम्ये पुनर्वस्योरुत्तमं स्नपनायनं ॥ ज्योतिर्निबंधे [illegible] ॥ पूर्वाहस्त
त्रये सार्पश्रुतिमूलेषु बह्वृचं ॥ यजुषां पौष्णमैत्रार्कादिसपुष्यमघाश्रवैः ॥ सामगानां हराश्वि
वे वसुपुष्योत्तराश्विते ॥ धनिष्ठादितिमैत्रार्के विष्णुपौष्णे श्वथर्वणं ॥ राजमार्तण्डः ॥ श्री
लणस्य पुनर्वसुनिषेधानि ॥ तारा चंद्रानुकूलेषु ग्रहा वेदेषु सुमेषु च ॥ पुनर्वसौ कृतो विप्रः पु
नः संस्कारमर्हति ॥ ज्योतिर्निबंधे नारदः ॥ सर्वेषां जीवशुक्रज्ञ वारा शोक्ता बलेषु भाः ॥
चंद्रार्कौ मध्यमौ ज्ञेयो सामबाहुजयोः कुजा ॥ शाखाधिपतिवारश्च शाखाधिपबलं त
था ॥ शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते ॥ शाखाधिपाश्च रत्नसंग्रहे ॥ ऋग्वेदाथर्वसा
म यजुषामधिपा गुरुसौम्य भौमसिताः ॥ जीवसितो च विप्राणां क्षत्रस्याप्युक्तवैशां

चंद्र इति॥ पारिजाते स्मृत्यंतरे॥ बह्वृचानां गुरोर्वारे यजुर्वेदजुषां बुधे॥ सामगानां धरासूनोरथर्वयजुषां रवे॥ अष्टम्यादिषु ध्यादिदैवतेभ्यो हेयं॥ विस्तरभयान्नोच्यते॥ मल्ल॥ व्रते हि पूर्वसंध्यायां रिदोयदिगर्जति॥ तद्दिने स्यादनध्यायो व्रतं तत्र विवर्जयेत्॥ ज्योतिर्निबंधे॥ नांदीश्राद्धे कृते चास्यादनध्यायस्त्वकालिकः॥ तदोपनयनं कार्यं वेदारंभेन कारयेत्॥ एतद्बह्वृचातिरिक्तानां तेषां तद्दिने वेदारंभाभावात्॥ अतस्तेषामुपनयनं भवत्येव॥ एतरेयश्रुतिपदाज्ज्येष्ठं तं वर्षतु गतं वर्षादित्रिरात्रमनध्याय इति वेदभाष्ये उक्तं॥ एतच्च शांतस्तनितेसायंस्तनिते तु दिवैव चरुं अपरदा सायं संध्योत्तरं होमं कुर्यात्॥ न संध्यागर्जितेकालेन रक्षुसातदूषिते॥ ब्रह्मौदनं पचेद्गोपक्वमन्नं न दुष्यतीति॥ प्रयोगरत्ने मदनरत्ने च॥ अत्र शांतिरप्युक्ता। नृसिंहप्रसादे ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं यदि॥ तदा विघ्नप्रकारं ज्ञेयं बटोरध्ययनस्य तु॥ तस्य शांतिं प्रकारं तु वक्ष्ये शास्त्रानुसारतः॥ प्रधानं पायसं तत्र साज्यं स्यात्सहस्रशतं हविः॥ सूक्तं बृहस्पते विद्वान्मैत्रं वास्तोष्पते द्वये॥ गायत्री चैव मंत्रस्यात्रायश्चित्तं तु सर्पिषा॥ धेनुः सवत्सा दद्याद्दाचार्याय पयस्विनी॥ ब्राह्मणानां शतं भोज्यं पश्चात्ततो ब्रह्मौदनं चरेत्॥ उपनयनेऽस्याधिकारिणः॥ माधवीये वृद्धमनुनोक्ताः॥ पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः॥ उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः॥ प्रयोगरत्ने॥ पितैवोपनयनेत्तु अन्यतदभावे पितुः पिता॥ तदभावे पितुर्भ्राता तदभावेऽपि सोदरः॥ पितेति विप्रपरं न क्षत्रियादेः॥ तेषां पुरोहितेनैवोपनयनस्मृत्यर्थत्वात्॥ तेषां स्वाध्ययनेऽनधिकारात्॥ अत्र पितृभ्यस्य ज्येष्ठभ्रातृभावेऽधिकारः॥ असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैरिति याज्ञवल्क्योक्तेः॥ उक्ताधिकार्यभावे दपि कार्यं॥ कारिकायां निबंधे॥ अपनीतो ऽलपुत्रादेरभावे न्यं नियोजयेत्॥ तदोपनयनेऽपि श्रादिमुद्दिश्याभ्युदयं चरेत्॥ कन्यकायां विवाहेऽपि विधिरेषः सनातनः॥ संग्रहेऽपि॥ अन्यगोत्रः सगोत्रो वा उपनेना यदा भवेत्॥ स्वपितृं ध्येजेन्मो

२२

ह्यासुप्यंतेनात्पितामहा इति ॥ उपनेयपितर इत्यर्थः ॥ तंत्रेच ॥ पितापितामहश्चैव तथैव प्रपितामहः ॥ जातं
पुत्रं त्वराक्षंतेशंकुलाद्‌वपिप्रभिरिति ॥ यत्तु ॥ अन्यगोत्रः सगोत्रोवा आचार्योयउपानयेत् ॥ आचार्यपित
त ३ रस्तत्र नांदीश्राद्धेतु देवताइति तद्दत्तविषयं ॥ मातुरजोदोषेतु प्रागुक्तं ॥ संग्रहे आचार्यस्यप्रदेशश्च
श्चतुर्भिर्हस्तैर्विस्तृते ॥ विस्तृताच्चतुरस्रान्यवत्रो वेदिकरोत्ततेति ॥ अथषंढमूकादीनां विशेषः ॥ प्रयो
गपारिजाते ॥ ब्रह्मोब्राह्मण्यां ब्राह्मणात्जातो ब्राह्मणस्स इति ॥ स्मृतौ ॥ तस्माद्षंढबधिरकुलवारम
नपंगुषु ॥ जडगद्गदरोगार्तशुष्कांगविकलांगिषु ॥ मत्तोन्मत्तेषुमूकेषु शयनस्थे निरिंद्रिये ॥ ध्वस्त
पुंस्त्वेषु सर्वेषु संस्काराःस्युर्यथो ॥ चितं ॥ मत्तोन्मत्तौनसंस्कार्याविमपरेत्वांकुरन्यथा ॥ संस्कारमंत्रहोमादी
न्करोत्याचार्यएवतु ॥ उपनेयांश्च विधिवदाचार्यस्वसमीपतः ॥ आनीयाग्निसमीपं च सावित्रीस्पर
श्यवाजमेव ॥ कन्यास्विकरणोदन्यस्वैर्विप्रेणकारयेत् ॥ एवमेवद्विजैर्जातो संस्कार्यौ कुंडगोलका
विति ॥ स्मृत्यर्थसारेप्येवं ॥ कुंडगोलकयोः संस्कार्यत्वश्राद्धनिषेधश्च क्षेत्रजपुत्रविषयं ॥ उपनयनंच
कुमारंभोजनं रक्षाकार्या ॥ प्रागेवेतुंतदहर्भोजयंतीतिमदनयोगपारिजातेगोभिलोक्तेः ॥ अन्यस्य
विनारवेषविधिस्मृत इतिवचनात् ॥ अन्यस्याब्राह्मण्ये नोपनयनाद्यशक्तेः ॥ इस पराकः ॥ गायत्र्यु
पदेशश्चोत्तरतोग्नेः कार्यः ॥ उत्तरेणाग्निमुपविशतः ॥ प्राङ्मुख आचार्यः प्रत्यङ्मुखस्तरोधिहीभो
जइतिसांख्यायनसूत्रोक्तेः ॥ यद्यपिकात्यायनेनाथास्मैसावित्रीमन्वाहोत्तरतोग्नेः प्रत्यङ्मुखायेत
क्तादक्षिणतस्तिष्ठतआसीनायवैक इति विकल्पउक्तः ॥ तथापिकात्यायनमेवस ॥ बहृचानांतूत्तरत
एववेदेक्याल ॥ भिक्षायांविशेषमाह कात्यायनः ॥ मातरमेवाग्रेभिक्षेत ॥ पाराशरमाधवीये ॥ मातरं

वाम्रसारंनामालुर्वीप्तगिनानिर्भ्भो॥भिक्षेतभिक्षांप्रथमंयाचैनंनविमानयेत्॥ अथसंस्कारलोपप्रायश्चित्त
आरभ्यधानामाचोलात्कालेतानेतुकर्मणेऽ॥व्याहृत्याज्यंसुसंस्कृतान्मंयथाक्रमं॥एतेषेचैकलोपे
लुपादकृच्छ्रंसमाचरेत्॥चूडायांअर्धकृच्छ्रस्यादापदितेवमीरितं॥अनापन्नस्तुसर्वत्रद्विगुणंद्विगुणंचरेत्॥
पारिजातेकात्यायनः॥लुप्तेकर्मणिसर्वत्रप्रायश्चित्तंविधीयते॥प्रायश्चित्तेकृतेपश्चाल्लुप्तंकर्मसमाच
रेत्॥स्मृत्यर्थसारेचैवं॥प्रायश्चित्तेकृतेतालंलुप्तंकर्मकृतासतंमिहत्यक्तं॥प्रायश्चित्तेकृतेपश्चादतानुमपिक
र्मयेत्॥कार्यमित्येकआचार्यनेमनेतुविपश्चितः॥लिंकाउनेमंडनेनतु॥कालातीतुकार्येषुमासवत्सवरेषुच॥
कालातीतानिसर्वाणिविदध्यादुत्तराणितु॥इति॥तत्रसर्वेषांतत्रैषानांदाश्राद्धानिचकुर्यात्॥देशकालस्ये
त्यादि॥गणेशाःक्रियमाणानांमातृणांपूजनास्मृतम्॥सकृदेवभावेश्राद्धंमादौनपृथगादिषुतं॥एतश्वा
द्रोदयेछंदोगपरिशिष्टात्॥एतद्बहूनामपत्यानांयुगपत्संस्कारकरणविषयमितिबोपदेवः॥अतोनसंस्कारा
णांयुगपत्करणं॥इत्यन्ये॥तत्रापि॥चौलस्यउपनीयासहेतिपक्षेउपनीतद्दिनेएवानुष्ठानंपूर्वदिने॥सहत्वस्य
दिवसैक्यसंनिकृष्टपरत्वात्॥वृद्धाचारोप्येवं॥उपनीतदिनेमध्यान्हसंध्यामाहपारिजाते॥जैमिनिः॥यावद्ब्रह्मो
पदेशास्तुतावत्संध्यादिकंनच॥ततोमध्यान्हसंध्यादिसर्वकर्मसमाचरेदिति॥ब्रह्मगायत्री॥यत्तुवचनं॥
उपानेनखलुकर्तव्यंसंध्योपासनमाचरेत्॥आरंभेब्रह्मयज्ञेतुमध्यान्हेतुपरेहनि॥तद्वारवातरविषय
मितिपारिजाते॥नविकल्पइतितुयुक्तंपश्यामः॥उपनयनाग्निस्त्रिरात्रंधार्यः॥त्र्यहमतदग्निंधारयतिरा
पस्तंबोक्तेः॥मेधाजननार्थक्षेत्रमोपनयनानलं॥तत्रैवसायंप्रातश्चसमिधंजुहुयादसो॥तथा॥उ
पानयनाग्निर्यदिनाशनंगतः॥पुनःसमाधायतथैववन्हिंकृत्वाज्यसंस्कारयथादिशेणंनमोजि

वस्त्राजिनदंडधारणमिति बह्वृचायनस्त्वत्रेतुसाधारणमित्युक्तं॥ उपनयनादिरग्निस्तत्कर्मोपास
नमित्साचेक्षलेपाणिग्रहणमित्से के निहे धार्येनुगतो नियमार्थी इति इदं जाताय णिपक्षेऽन्यथा
न्मयंमसंवाल॥ ब्रह्मचर्यविशेषमाह॥ जैमिनिः॥ अनुपासनं वदेस्य कर्तव्यो ब्रह्मचर्यकः॥
वेदस्थानेतुसाविश्री गृह्यतेतत्समोयत इति॥ एषांतद्दिने एव वदारंभलेपान्नेदमितिदिक्॥ अ
थ ब्रह्मचारिधर्माः॥ याज्ञवल्क्यः॥ मधुमांसंजनोच्छिष्टं नक्तं स्त्री प्राणिहिंसनं॥ भास्करालोक
नाश्लीलपरिवादादि वर्जयेत्॥ मनुः॥ अभ्यंगमंजनंचाक्ष्णोरुपानच्छत्रधारणम्॥ वर्जयेदिति
प्रसक्तं॥ पारिजाते कौर्मे॥ नादर्शं चैव वा वीक्षेत नाचरेद्दंतधावनं॥ गुरूच्छिष्टं भेषजार्थं प्रयुंजीत न
कामतः॥ एतन्निषिद्धमध्वादिविषयं॥ अन्यगुरूच्छिष्टस्य सर्वदा प्राप्तेः॥ सचेतनव्यायीत कामं गुरो
रुच्छिष्टं भेषजार्थं सर्वं सर्वं प्राश्नीयादिति॥ वसिष्ठोक्ते॥ ज्येष्ठभ्रातुरेवापि ह्येयं॥ पितुर्ज्येष्ठस्य
चभ्रातुरुच्छिष्टंभोजनमिहापस्तंबोक्तेः॥ गुरुपुत्रेतुस्मृत्यंतरेउक्तं॥ गुरुवद्गुरुपुत्रस्य त्वस्यादन्य
त्रोच्छिष्टभोजनात्॥ प्रचेताः॥ तांबूलाभ्यंजनंचैव कांस्यपात्रे च भोजनं॥ यतिश्चब्रह्मचारी च वि
धवा च विवर्जयेत्॥ यमः॥ मेखलाजिनदंडमुपवीतं च मिसरा॥ कौपिनं कटिसूत्रं च ब्रह्मचारी
च धारयेत्॥ अग्निंधनं भैक्ष्यचर्यामधः शय्यां गुरोर्हितं॥ कुर्यादिति विशेषः॥ मेखलामाहाश्व
लायनः॥ तेषां मेखला मौंजी ब्राह्मणस्य धन्वज्यौक्षी त्रिभिस्यादि वैश्यस्येति॥ आचार्यः॥ त्रि

वृत्ता मेखला कार्या त्रिशरं स्यात्समावृता ॥ तद्ग्रंथयस्त्रयः कार्याः पंच वा सप्त वाथवा ॥ मनुः ॥
मौंजी त्रिवृत्समा श्लक्ष्णा कार्या ॥ विप्रस्य मेखला ॥ त्रिवृता ग्रंथिनैकेन त्रिभिः पंचभिरेव वा ॥ मौं
ज्यभावे तु कर्तव्या कुशाश्मंतकबल्वजैः ॥ अत्र प्रवरसंख्यया नियम इति वृद्धाः ॥ अथ दंडाः ॥
मनुः ॥ ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ॥ पैप्पलौदुंबरौ वैश्यो दंडानर्हति धर्मतः ॥
एषामभावे गौतमः ॥ यज्ञियो वा सर्वेषां मूर्धललाटनासाग्रप्रमाणा इति ॥ अथाजिनान्याश्वलायनः ॥
अहतेन वाससा संवीतमैणेयेनाजिनेन ब्राह्मणं रौरवेण क्षत्रियमाजेन वैश्यमिति ॥ यच्चै
णेयशब्देन मृगचर्मैवोच्यते ॥ एणपात्रित्रियणीस्थले ॥ एणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रि
षु त्विति ॥ अमरकोशात् ॥ तथापि तत्स्मृतवस्त्राण्यजिनानीति शंखोक्तेः ॥ सर्वेषां वा रौरवमिति
यमोक्तेश्च मृगचर्मणा सह विकल्पो ज्ञेयः ॥ वस्त्राजिनयोस्तु विकल्पः ॥ कार्पासं वापि कृतमिति गौ
तमोक्तेः ॥ अथ यज्ञोपवीतं ॥ मनुः ॥ कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ॥ पारिजाते देवलः ॥
कार्पासक्षौमगोवालशणवल्कतृणादिकं ॥ यथासंभवतो धार्यमुपवीतं द्विजातिभिः ॥ वामा
वर्तवलितं त्रिगुणं दक्षिणावर्तवलितं कर्तव्यं स एव स्मृतं तु ः एवं त्रिगुणं कामिसर्यः तत्त्रिवृतं
वृत्कार्यं शाखिन्या त्रिगुणं कार्यं नवसूत्रं तु तद्भवेत् ॥ इति तैत्तिरीये ॥ भृगुः ॥ त्रिवृदूर्ध्ववृतं कार्यं
तंतुत्रयमधोवृतं ॥ त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते ॥ ऊर्ध्वं [illegible] वृत्तं दक्षिणावर्तमूर्ध्ववृत्त
वलितं ॥ कात्यायनः ॥ पृष्ठदेशे च नाभ्यां च धृतं यद्विंदते कटिं ॥ तद्धार्यमुपवीतं स्यान्नातिलंबं न चो
च्छ्रितं ॥ वसिष्ठः ॥ नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः ॥ तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः ॥

पारिजाते देवलः ॥ उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते ॥ एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः ॥ स
एव ॥ बहूनि चायुष्कामस्यात्र माह ॥ शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके ॥ आवर्त्य षण्णवत्यां तत्त्रिगु
णीकृत्य यत्नतः ॥ आलिंगकैस्त्रिभिः सम्यक् प्रक्षाल्योर्ध्वं तं त्रिवृत् ॥ सप्रदक्षिणया वृत्त्या सावित्र्या त्रिगुणीकृ
तरज्जि ॥ ततः प्रदक्षिणावर्तं वलितं त्रिगुणं स्यात् दक्षिणावर्तं वलितं कार्यं ॥ स एव संग्रहः ॥ एवं नियतं तन्तु
मितस्यार्थः ॥ स एव ॥ यज्ञोपवीतिमितिवा व्याहृत्या वापि धारयेत् ॥ हेमाद्रौ ॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्म्म
मणि ॥ तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते ॥ देवलः ॥ सावित्र्या दशकृत्वोऽद्भिर्मंत्रिताभिस्तदुक्षयेत् ॥
विछिन्नं चाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत् ॥ मनुः ॥ मेखलामजिनं दण्डमुपवीतं कमण्डलुः ॥ अप्सु प्रास्य
विनष्टानि गृह्णीतान्यानि मंत्रितं ॥ इत्युपवीतनियमः ॥ अथ व्रतलोपे प्रायश्चित्तं ॥ मनुः ॥ अकृत्वा भै
क्षचरणं असमिध्य च पावकं ॥ अनातुरः सप्तरात्रं अवकीर्णिव्रतं चरेत् ॥ अमहा आपद्यागे तु [illegible]
[illegible] ॥ भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः ॥ कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयं ॥
उपस्थानं ततः कुर्यात्समासिंचंत्वनेन तु ॥ मंत्रास्त्वमिताक्षरायास्तेयः ॥ सङ्क्लोपे तु ऋग्विधाने ॥
मानस्तोके जपेन्मंत्रं शतसंख्यं शिवालये ॥ अग्निकार्यं विनाप्युद्धेः न पापं ब्रह्मचारिणः ॥ सप्तसर्थी
सारेतु ॥ संध्याग्निकार्यलोपे तु स्नात्वाष्टसहस्रं जपः ॥ भिक्षालोपे अष्टशतं ॥ अभ्यासे द्विगुणं
पुनः संस्कारसंज्ञं ॥ भाष्ये संवर्तः ॥ यः संध्यां चैव नोपास्ते अग्निकार्यं यथाविधिः ॥ गायत्र्य
ष्टसहस्रं तु जपेत्स्नात्वा [illegible] ॥ समाहितः ॥ अग्निकार्यं तु संध्याद्वये कार्यं ॥ अग्निका

यैतत्कुर्यात्संध्ययोरुभयोरपि॥ याज्ञवल्क्योप्युक्ते॥ सायमेववाग्लायमेग्वाग्निमिंधाते॥ पारिजा
तेशातातपः॥ ब्रह्मचारीस्तु यो श्नीयान्मधुमांसंतथैवच॥ प्राजापत्यंचरेत्कृच्छ्रंमौंजीहोमेनशुध्य
ति॥ कामतस्तुमाधवीये॥ ब्रह्मयमः॥ मधुमांसंचयो श्नीयाच्छ्राद्धेसूतकमेवच॥ प्राजापत्यंचरेत्कृ
च्छ्रंव्रतशेषंसमाचरेत्॥ ऋग्विधाने॥ तंवोधियाजपेन्मंत्रंलक्षंचैवशिवालये॥ ब्रह्मचारीस्वध
र्मेषुन्यूनंचेत्पूर्णमेतितत्॥ स्त्रीसंगेतुमनुः॥ अवकीर्णीतुकाणेनगर्दभेनचतुष्पथे॥ स्थाली
पाकविधानेनयजेद्दैनिर्ऋतिंनिशि॥ विस्तरस्तुमिताक्षरादौज्ञेयः॥ उपवीतंनाशेतुहारीतः॥ म
नोव्रतपतीभिश्चतस्रआज्याहुतीर्हुत्वापुनःप्रतीयात्॥ तत्रैवमरीचिः॥ ब्रह्मसूत्रंविनाभुंक्ते ष
ण्मूत्रंकुरुतेथवा॥ गायत्र्यष्टसहस्रेणप्राणायामेनशुध्यति॥ मनुः॥ भोशब्दंकीर्तयेदंतेस्वस्यना
म्नोभिवादने॥ आयुष्मान्भवसौम्येतिवाच्योविप्रोभिवादने॥ आकारश्चास्यनाम्नांतेवाच्यःपू
र्वाक्षरःप्लुतः॥ शर्मन्नितिकारात्पूर्वर्द्दसर्थः॥ अभिवादनप्रत्यभिवादनादौविशेषः॥ स्मृत्यर्थसा
रेपारिजातादौज्ञेयः॥ यमः॥ ज्यायानपिकनीयांसंसंध्यायामभिवादयेत्॥ विनाशिष्यंच
पुत्रंचदौहित्रंदुहितुःपतिं॥ अथपुनरुपनयनमितितानिपारिजातेशातातपः॥ लशुनंगृं
जनंजग्ध्वापलांडुंचतथाशुनं॥ उष्ट्रमानुषकेभास्वरासभाक्षीरभोजनात्॥ उपायनंततः
कुर्यात्तप्तकृच्छ्रंचरेत्पुरःइति॥ हेमाद्रौवृद्धमनुः॥ जीवयदिसमागच्छेद्घृतकुंभेनिमज्यच॥
उद्धृत्यस्नापयित्वास्यजातकर्मादिकारयेत्॥ तत्रैवपाद्मे॥ प्रेतशय्याप्रतिग्राहीपुनःसंस्कारम
र्हति॥ चंद्रिकायांबौधायनः॥ सिंधुसौवीरसौराष्ट्रांस्तथातत्प्रत्यवासिनः॥ अंगवंगकलिं

गाम्श्च गत्वा संस्कारमर्हति ॥ हेमाद्रौ प्रायश्चित्तकांडे ॥ वृद्धगौतमः ॥ ॥ छ ॥ छ ॥ खरमुष्ट्रं च महि
षमन्वारोहमलं तथा ॥ वस्त्रमात्त्रप्रसुरवकोशेषांद्रविनिर्दिशेत् ॥ मार्कंडेयः ॥ खरमारुह्य
विप्रस्तु यो जनं यदि गच्छति ॥ तप्तकृच्छ्रत्रयं शोक्तं शरीरस्य विशोधनं ॥ पुनर्जन्म प्रकुर्वीत तथा
वर्गाग्निविधानतः ॥ मदनरत्ने मिताक्षरायां च स्नानमात्रमुक्तं ॥ सुमंतुः ॥ अज्ञानात्प्राश्य वि
ण्मूत्रं सुरासंस्पृष्टमेव च ॥ पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः ॥ मिताक्षरायां पराशरः ॥
यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः ॥ अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति ॥ सचरेत्त्री
णि कृच्छ्राणि त्रीणि चांद्रायणानि च ॥ जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् ॥ बौधायन
स्तत्रे अथोपनीतस्या जन्मानि नान्यच्छिष्टं भुंजीतान्यत्र पितृज्येष्ठाभ्यां तान्स्त्रियासह भुंजी
ते मधुमांसश्राद्धसूतकानि दशाहं संधिनीक्षीरं घनाकनिर्यासौ विलयनगणान्नगणिकान्न
मित्येषु पुनः संस्कारः प्रतिषिद्धदेशगमने मैथुनके थामथाप्युदाहरंति ॥ सुराष्ट्रं सिंधुसौवीरम
वंतीं दक्षिणापथं ॥ एतानि ब्राह्मणो गत्वा पुनः संस्कारमर्हति मनुर्मितौ च ॥ अथ पुनः संस्कारं व्याख्या
स्यामो देवयजनप्रभृत्याग्निमुखोत्ता पालाशसमिधां ज्येन प्याध्याय पाचयति पुनः स्त्वार
द्राव सवः कामात्वाहे सयाज्येजुहोति ॥ येन देवाः पवित्रेणेत्येतिस्वभिः स्तुछंदसांस्वष्टदू
सप्रदानात्तथा परिधानात् ॥ कृत्वा पालाशीं समिधमाधाय यावत् प्रायश्चित्तं जुहोत्यथ
व्याहृता जुहोति अथ परसाविव्याशकृतो घृतसमभिमव्यप्रात्रपवृत्तप्रायश्चित्तौ भवाणि
गुरुर्वा पुष्छिष्टेषु जातात्याप्युदाहरंति दयनं दक्षिणादानं मेखलादंडमजिनाम ब्रह्मचर्यो व्रता

पि कर्मणीति आश्वलायनगृह्ये तथोपेतपूर्वस्येत्यादिना पुनःसंस्कारायंति ॥ तथापि
त्यादिर्व्यतिरिक्तेन ब्रह्मचारिणः श्रौतकर्मकरणे पुनरुपनयनमिति परार्कोदयः ॥ त्रिस्थली
सेतौ कर्मनाशाजलस्पर्शात् करतोयाविलंघनात् ॥ गंडकीबाहुतरणात् पुनःसंस्कारम
र्हति ॥ गौडास्तु ॥ करतोयाजलस्पर्शात् कर्मनाशाविलंघनादिति ॥ प्रकृतं ॥ तत्रादान
धर्मेषु करतोयास्नाने प्रायश्चित्तेः ॥ करतोया सदानीरे सरिच्छ्रेष्ठेति विश्रुते ॥ अप्लावयति
पौराणां पापं कर्म करोतीति स्मृतिदर्पणे ॥ ग्रहिवेतस्नानमंत्रा ॥ पराशरः ॥ अजिनमेख
लादंडो भैक्ष्यचर्याव्रतानि च ॥ निवर्तंते द्विजातीनां पुनःसंस्कारकर्मणि ॥ हरदत्तस्तु
यः ॥ एकं वेदमधीत्यान्यवेदमध्येतुमिच्छति ॥ तस्य पुनरुपनयनं ॥ तेन प्रतिवेदमुपनयनं मे
धाह ॥ अन्ये नैतन्मन्यंते ॥ सर्वेभ्यो वेदेभ्यः सावित्र्यनुच्यत इत्यापस्तंबोक्तेः ॥ तद्विधिः कलव्य ८
कारिकायां ॥ वेदांतमधीत्यैव ऋग्वेदं यदधीयते ॥ उपनीतिरियं तेषामलंकरणविवर्जि
ता ॥ यद्येतदुपनीतस्य प्रायश्चित्तं यदा भवेत् ॥ कृताकृतं च वपनं मेधाजननमेव च ॥ मे
धाजननसद्भावे ब्रह्मचर्यां भवेदिह ॥ अनुप्रवचनीयश्च तदभावे द्वयं नहि ॥ यदानंदिवा
कार्यं स्यान्निमित्तानंतरं त्विदं ॥ पूर्वस्योपाचये स्थाने तत्सवितुर्वृणीमह इति ॥ यत्तु हारित ॥
द्विविधाः स्त्रियः ब्रह्मवादिन्यः सद्योवध्वश्च तत्र ब्रह्मवादिनीनामुपनयनमग्नींधनं वेदाध्य
नं स्वगृहे च भैक्ष्यचर्येति ॥ सद्योवधूनामुपनयनं कृत्वा ॥ विवाहः कार्य इति ॥ तद्यमाल
रविषयं ॥ पुराकल्पेषु नारीणां मौंजीबंधनमिष्यते ॥ अध्यापनं च वेदानां सावित्रीवच

नं नयेति ॥ यमोक्तेः ॥ अथानध्यायः ॥ पारिजाते हारीतः ॥ प्रतिपत्सु चतुर्दश्यामष्टम्यां प
र्वणोर्द्वयोः ॥ श्वोऽनध्याये द्यदर्शे नाधीयीत कदाचन ॥ नारदः ॥ अयने विषुवे चैव श
यने बोधने हरेः ॥ अनध्यायस्तु कर्तव्यो मन्वादिषु युगादिषु ॥ निर्णयामृते ॥ चातुर्मास्यस्य
द्वितीयासु मन्वादिषु युगादिषु ॥ अनध्यायस्तु कर्तव्यो यावत्सोपपदास्तिथिः ॥ गर्गः ॥ शुचा
र्ज्जे ज्येष्ठयोर्द्वितीया विधुक्षये ॥ [redacted] चातुर्मास्यद्वितीयास्तु प्रवदन्ति म
नीषिणः ॥ स्मृत्यर्थसारेऽपि ॥ आषाढी कार्तिकी फाल्गुनी समीपस्थद्वितीयास्वपि चेति ॥ मनुः ॥
उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं ॥ अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिष्विति ॥ उत्स
र्गे तु मनूक्तेः पक्षिण्यहोरात्रयोस्त्र्यहस्य विकल्प इति ॥ विज्ञानेश्वरः ॥ अष्टकाशब्देन सप्त
म्यादित्रयं ज्ञेयं ॥ तिस्रोऽष्टकास्त्रिरात्रमन्त्यामेक इति गौतमोक्तेः ॥ तत्र तासीति ॥ सौरकृते
नात्सु चान्द्रात्स्य पर्वहैनेव निषेधसिद्धेरिति ॥ सर्वज्ञनारायणः ॥ नैमित्तिकानध्यायाह ॥ याज्ञव
ल्क्यः ॥ त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ॥ उपाकर्मणि चोत्सर्गे स्वशाखश्रोत्रिये त
था ॥ संध्यागर्जितनिर्घातभूकम्पोल्कानिपातने ॥ समाप्य वेदं द्युनिशमारण्यकमधीत्य
च ॥ पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ॥ ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य
च ॥ पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः ॥ कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥
यत एवं धुनि शोक्तानि वा प्रियस्तास्ते त्र्यहं स्मृतं ॥ प्राकृ ॥ स्मृत्यर्थसारे तु रात्रौ यदे
ति स्त्रो रात्रिः दिवा च त्र्यहं स्मृतं ॥ स्मृतिसारे ॥ श्रुते सत्सव विषयं ॥ ऊर्ध्वभोजनो २५

उत्सवेति॥ गौतमोक्तेः॥ प्रातरादिकंमहेंद्रोद्दिष्टश्चिन्त्यं॥ न चतुःस्यह इति मनुः॥ स्मृत्यर्थसारे चैवं प-
क्षत्राधूलराज्ञेत्र्यहमुपवासो विश्वास स्येति॥ गौतमोक्तेः॥ तत्प्रथमाध्ययने॥ याज्ञवल्क्यः॥ श्वक्रो-
ष्टुगर्दभोलूकसामबाणार्तनिस्वने॥ अमेध्यशवशूद्रांत्यस्मशानपतितांतिके॥ देशेऽशुचावात्मनि
च विद्युत्स्तनितसंप्लवे॥ भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते॥ पांसुप्रवर्षे दिग्दाहे संध्यानीहा-
र भीतिषु॥ धावंतः पूतिगंधे च शिष्टे च गृहमागते॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे॥
सप्तत्रिंशदनध्यायां नेतांस्तात्कालिकान्विदुः॥ बाणो वंशः॥ शतंतंतु विलेलिहरदन्तः॥ अमे-
ध्यस्मृतिकाद्ययं॥ स्तनितं गर्जितं वर्षितोन्यत्र गर्जे दृष्टिविद्युत्तायोगपद्ये अकालिकं॥ वर्षासु
तावपत्कालीकं इति नारायणः॥ संध्यागर्जितं हारीतः॥ सायंसंध्यास्तनिते रात्रिं॥ प्रातःसंध्यास्तनि-
ते होरात्रं॥ रात्रौ विद्युत्स परा त्र्यावधिः॥ विद्युति नक्तं॥ चापरात्रिंदिति गौतमोक्तेः॥ दिनतृतीयांशो-
नेरंतु विद्युति सर्वरात्रिमिहाहः स एव॥ त्रिभागादिप्रवृत्तौ सर्वमिति॥ अर्द्धरात्रे मध्ययामद्वये इति
विज्ञानेश्वरः॥ मध्यंदंचतुष्टये इति निर्णीयामृते मनुः॥ न विवादे न कलहे न सेवायां न संगरे॥
न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके॥ रुधिरे च श्रुते गात्र शास्त्रेणाच्च परीक्षते॥ कौर्मे॥ श्ले-
ष्मातकस्य छायायां शाल्मलेर्मधुकस्य च॥ कदाचिदपि नाध्येयं कोविदारकपित्थयोः॥ मनुः॥ श-
यानः प्रौढपादश्च कृत्वा चैवावसक्थिकां॥ नाधीयतामिषं जग्ध्वा सूतकान्नाद्यमेव च॥ प्रौढः
पादः पादोपरिपादः हाला आसनारूढपादा चेति हरिदत्तः॥ सोमपदास्विति पाठस्तु॥ स्मृत्यर्थसा-
रे॥ श्रवणद्वादशी मघाकरण्योः प्रेतद्वितीयायां रथसप्तम्यामाकाशे शवदर्शने चाहोरात्रं॥

भसपिंडेगुरौत्रिरात्रं आचार्यपुत्रपत्न्योश्च पक्षिणी ॥ आचार्यभार्यापुत्रशिष्येष्वहोरात्रं ॥ असंस्कृतसा
तौ गोत्रे विप्रमृतौ त्रिरात्रं ॥ अयने विषुवे च पक्षिणी ॥ अकालरत्नं ॥ आरण्यमार्जारसर्पनकुल
प्यचनरवादेरंतरागमने त्रिरात्रं ॥ आरण्यश्वसृगालादि वानरजकादौ द्वादशरात्रं ॥ श्वखरकराह्वं
चंडालसूतिकोदक्यश्वादौ मासं ॥ गौतमः ॥ नास्तिकादौ त्रिमासं ॥ शशमेषश्वपाकादौ षण्मा
सं गजदंड सारसः सिंहव्याघ्रमाहायादि शोभनदिने चानध्यायः ॥ विवाहप्रतिष्ठोद्यापनादिष्व
समासेसगोत्राणामनध्यायः ॥ उदयेस्तमये वापि मुहूर्तमात्रयगामि यत् ॥ तद्दिनं तदहोरात्रं चान
ध्यायविदो विदुः ॥ वैयोचिदाहु ॥ कचिद्दृश्येयावतद्दिननाडिकाः ॥ प्रदोषेलक्षधीयितत्रता यान्तवना
डिका ॥ निर्णयामृते गर्गः ॥ रात्रौ यामत्रयादर्वाक् सप्तमी वा त्रयोदशी ॥ प्रदोषः ॥ सनुर्विंशेयो वेदा
ध्ययनगर्हितः ॥ कौर्मे ॥ अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ॥ न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि
वर्जयेत् ॥ शौनकः ॥ नित्यजपे नकाम्ये च स्तोत्रेपारायणेपि च ॥ ननाध्यायोस्तु वेदानां ग्रहणे ग्राहये
स्मृतः ॥ इत्यनध्यायः ॥ अथ महानाम्न्यादिव्रतं ॥ श्रीधरः ॥ तिथिनक्षत्रवारांशादृष्टौ दयनिश्चयं ॥ चौ
लवर्ल्मारव्यातं सगोदानं व्रतेषु च ॥ एतेषां लोपे शौनकः ॥ व्रतानि विधिनाहुत्वा स्वशगरवाध्यपनं च
रेत् ॥ अस्य त्वस्यनेयेनस्वपाणि विधिघातकः ॥ प्रत्येकं स्युप्रमेवं कंचरित्वा व्याहृतिशालं वृत्वाचे
वतु गायत्र्या स्वा पादिसाहू शौनकः ॥ अथ धर्मसारे तु ॥ त्रीन् षड् द्वादश वार स्युरक्षा पुनर्व्रतं च रे
दियत्नतः ॥ अथ समावर्तनं ॥ सुरेश्वरः ॥ भौमभानुजवायोरेन क्षेत्रे च व्रतोदिने ॥ ताराचंद्रविशुद्धे
च स्यात्समावर्तनं क्रिया ॥ वसिष्ठः ॥ स्नानं मध्यान्हकाले तु होरायां कारयेद्बुधः ॥ पूर्वोक्ताहोलद भावे
तु कुर्यात्स्नानं यथाविधिः ॥ सर्वेषु कृतवो विवाहस्येस्त्वाद्यदाक्षिणायने विवाहस्ते दास मावर्तनम

पितृमेध॥ अन्यथोगदयनेसमावर्तनेनोग्निमनतिष्टेनेतिविरोधस्यादित्युक्तं॥ सुदर्शनभाष्ये॥ श्री
धरः॥ गार्ग्याशादितिसौम्यपौष्णादितिवस्विश्रुत्युत्तरारोहिणीगोविंदेषुशशांकभानुगुरुविष्णुकारा
वारादिषु॥ रिक्तांपर्वतथाष्टमीप्रतिपदंमेषंचकीटंहरिंहित्वास्तुप्रसुतेष्टमेन्हिविमलेषुवासमावर्त
नं॥ एतच्चब्रह्मचारीव्रतलोपेप्रायश्चित्तंकृत्वाकार्यं॥ तदाहबोधायनः॥ शौचसंध्यादर्भगोग्निश्चाग्नी
कार्यैरहितःकौपिनोपवीतमेखलादंडाजिनधारणोदिवास्वापछत्रपादुकास्रग्विधारणोद्वर्तनानु
लेपनांजनद्युतनृत्यसंगीतवाद्यानिरतोब्रह्मचारीस्त्रीछत्रयंचन्महाव्याहृतिहोमंचकुर्यात्॥ स
मावर्तनोत्तरंपूर्वंमृतानांत्रिरात्रमाशौचंकार्यं॥ आदिष्टिनानोदकंकुर्यादाव्रतस्यसमापनात्॥ स
माप्तेतुदकंदत्त्वात्रिरात्रमशुचिर्भवेदिति॥ मनूक्तेः॥ आदिष्टिब्रह्मचारीतिविज्ञानेश्वरः॥ ब्रह्मचर्य
यदिकश्चिन्मृतस्तदात्रिरात्रमध्येविवाहःकार्योन्यथान्येतिसिध्यति॥ जननेतुसहोपिनत्रिरात्रं॥
तत्रातिक्रांताशौचाभावात्उदयकंदद्यादितिवचनान्नेतिदिक्॥ जातकब्रतान्याहव्यासः॥ यज्ञो
पवीतद्वितयंसोदकंचकमंडलुं॥ छत्रंचोष्णीषममलंपादुकेचाप्युपानहौ॥ रौक्मेचकुंडलेवेदः
कृत्तकेशनखःशुचिः॥ वेदोदर्भवटुमनुः उपानहोचवासश्चधृतमन्येनधारयेत्॥ उपवीतमलं
कारमलंकरकमेवच॥ अन्यान्यपिबहुचारुह्यस्मृत्यादिभ्योज्ञेयानि॥ अथछुरिकाबंधः॥ ज्योति
र्निबंधेनारदः॥ छूरिकाबंधनंवक्ष्येनृपाणांप्राग्विवाहतः॥ विवाहोक्तेषुमासेषुशुक्लपक्षेप्यनु
स्तगे॥ जीवेशुक्रेचभृगुपुत्रेचंद्रताराबलान्विते॥ मौंजीबंधर्क्षतिथिषुकुजवर्जितवासरे॥ संग्रहे॥
शूद्राणांराजपुत्राणांमौंजीभावेस्त्रबंधनं॥ मौंजीबंधोक्ततिथ्यादौकार्यंनांदींविना॥ अथविवाहः॥

याज्ञवल्क्यः॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्॥ अनन्यपूर्विकां कान्तामसपिंडामवीयसीं॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां॥ लक्षण्यां बाह्यांतरलक्षणैर्युक्तां॥ बाह्यानि काशीखं
डादौ प्रसिद्धानि॥ आंतराण्यष्टौ पिंडान्नस्थले साश्वलायनोक्तानि॥ मनुः॥ असपिंडा च या मातुरसगो
त्रा च या पितुः॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥ दत्तिमायां तु गृहीता असपिंडासगोत्रा॥
न कुल इति दत्तये चकारान्मातुरसगोत्रा नादत्र कस्य पितुर्जनककुलो पितुरसगोत्रा गणी सपिंडत्वान्निषि
द्धेत्यन्यत्र विचारः॥ असपिंडा साषिंड्यरहिता॥ तच्चैकशरीरावयवान्वयेन भवति॥ एकस्य हि पितुर्मा
तुर्वा शरीरस्यावयवाः पुत्रपौत्रादिषु संक्रामन्ति परंपरया वा तु एकस्य शोणितादिरूपेणानुस्यूताः॥ य
द्यपि पत्न्याः पत्या सह भ्रातृपत्नीनां च परस्परं नैतत्संभवति तथापि एकशरीरत्वया॥ विज्ञानेश्वरः॥ व
यवान्वयो मेवश्रुतिभिद्दस्यनीति मंत्रलिंगात्॥ एकस्य हि पितृशरीरस्यावयवा पुत्रद्वारा तास्वाविति
ताइति विज्ञानेश्वराशयः॥ वाचस्पतिमिश्रद्वैतविवेकपत्रलघायादि गौडमैथिलदर्शनोऽप्येवं॥ श्रुतिरपि॥
एतस्मादपि शिक्षं शरीरं त्रीणि पितृतस्त्रीणि मातृतो अस्थि स्नायु मज्जा वा पितृतस्त्वं मांसरुधिरा
णि मातृत इति प्रजामनु प्रजायसे इत्यादि च॥ चंद्रिकापरार्कमेधातिथिः॥ माधवादयस्त्वेकपिंडदा
नक्रियान्वयित्वं साषिंड्यं॥ लेपभाजश्चतुर्थाद्याः पिंडाः पिंडभागिनः॥ पिंडदः सप्तमस्तेषां
साषिंड्यं साप्तपौरुषमिति मात्स्योक्तेः॥ न च पित्र्यादिष्वेतन्नास्तीति वाच्यं॥ तत्कर्तृकश्राद्धे देवते
क्यनत्वसत्वात्॥ देवदत्तकर्तृकश्राद्धे हि देवता भूतास्तेषां मध्ये यः कश्चिदन्यकर्तृकश्राद्धे तु प्रवि
शति तेषां साषिंड्यं तद्भार्यादीनामपि तत्कर्तृकश्राद्धे साहाधिकारित्वेन तदन्वयात्॥ एकलंसागतानाम
पि तु पिंडगोत्रेषु सूतके इतिस्थलेष्व॥ अतीतानां च वैराग्यार्थतात्तस्य साषिंड्यं निमित्तत्वे मानाभावात्॥

न च मातुलादिष्वेव नास्तीति वाच्यं ॥ मातामहस्य पदैवतैक्यात् ॥ ननु गुरुशिष्यादेरपि श्राद्धे
दैवताभावात् सापिंड्यं स्यात् ॥ किं वह नांसर्वाभावे नस्पर्शते ॥ कार्यैकत्वस्य रिक्थलत इति मार्कंडेय
पुराणाद्वाक्षोपि श्राद्धकर्तृत्वात् ॥ सापिंड्यप्रसंगाः स्वेष्टे ॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृ
तस्तथेति याज्ञवल्क्यवचनोक्तमातापितृ एव जसत्वात् ॥ ऊर्ध्वं सापिंड्यं निवर्तत इति शेषः ॥
ननु पंचमसप्तमाद्यवनियम्यते न मातृतः इत्यादिवाक्यभेदात् ॥ मैवं ॥ मातृकुले पंचमस्य पितृ
कुले सप्तमस्य चान्वबोधनेतुल्यत्वात् ॥ पौरुषेयत्वाद्दोष इति चेत् ॥ तुल्यमन्यत्रापि च ॥ अ
वयवान्वयपक्षे यथायोग रूढ्यापरिहारस्तथैहापि ॥ तेन मातृकुले पितृकुले चैकपिंडदानक्रि
यान्वयित्वं सापिंड्यमित्याहुः ॥ तेनैकस्यापि श्राद्धयेः षड्भ्यश्चादयश्च षट्पिंडाभवन्ति ॥ अन्य
केचित्तु मयूरः सापिंड्यनिवृत्तावेवाहाहोनान्यथेत्याहुः ॥ इदं चादयत्र संगेशसंवत्सापिंड्य
स्य सप्रतियोगिकत्वेन संयोगवद्द्विभयनिरूप्यत्वात् ॥ एकतो निवृत्तावन्यतो निवृत्तेरावश्यक
पुतम त्वात् ॥ कुमारस्यास्तमोवरः कुमार्यापि हितीयार्थलीयादिकामुद्वहेतित्याहुः ॥ सापिंड्ययोः
प्रतियोगिभेदेनाविरोधादित्याहुः इदमेव युक्तं ॥ प्राशौचेप्येवं सापिंड्यभेदोयं ॥ शिष्टास्तु नवध्
वरयोः खलुः सापिंड्यं किंतु कूटस्थसंततिसाद्द्वारस्त्वांप्रतिसपिंड एवैस विवाहः ॥ यत्तु मध्ये विच्छि
न्नमपि सापिंड्यं मंडूकप्लुतिवत् नवत्तु वर्तते यथा कूटस्थात्पंचम्यकन्ययोः प्रणीतमनिवृ
त्तिः ॥ तदपदेशोयोः स्वेनुवृत्तिस्तत्रापि नसापिंड्ययोः नदोषः ॥ संबंधिभेदात् ॥ अत्र कूटस्थ
मारभ्य गणना कार्या ॥ नहु तत्वं व ध्वावरस्यवातात कूटस्थादि सप्तमः ॥ पंचमी चेत्तयोर्मा ला

२८

तस्मात्सापिंड्यं निवर्तत इति ॥ कूटस्थोमूलपुरुषः ॥ विशदरूपनिबंधे भएवमुक्तप्रकारेणपितृ
बंधुभ्यस्तमातृ ॥ ऊर्ध्वमेवविवाह्यास्तं पंचमा[illegible]न्मातृबंधुतः ॥ संतानोपि द्युतेयस्मात्सर्वजा
ड्डुभयस्य च ॥ तमादाय गणो ढूमान्वरं यावस्ववकन्यका ॥ स्मृतिविवेके नारदः ॥ आसप्तमात्सं
चमाच्चबंधुभ्यः पितृमातृतः ॥ अविवाह्यासगोत्राचसमानप्रवरा तथा ॥ अत्र बंधुभ्य
इति पंचमानिर्देशात्पितुः पितृष्वसृपुत्रास्सप्तमी मातुः पितृष्वसृपुत्राच्च पंचमी सपिनस्यजेत् ॥
एवमन्यबंधुष्वपि ज्ञेयं ॥ तत्रापि त्रिगोत्रासंबंधे वर्गपि विवाहं कुर्यात् ॥ वक्ष्यमाणवचनात्त्रि
गोत्रगणनाच मातामहगोत्रापेक्षया ॥ नतु स्वापेक्षया ॥ अन्यथा पितुः पितामहदौहित्रदौ
हित्री ॥ पुत्री परिणेयास्यात् ॥ ब्रध्यामातामहगोत्रापेक्षयातु त्रिगोत्रांतरगतेनेविवाहप्र
संगः ॥ इति संबंधतत्त्वादयो गौडग्रंथाः ॥ संबंधविवेके शूलपाणिराह ॥ पंचमात्सप्तमादूर्ध्वं
गर्गापि पितृत्रिगोत्रांतरिताविवाह्या ॥ असवंधा सावेन्मातुः पिंडेनैवोढकेनवा ॥ साविवाह्या
द्विजातीनां त्रिगोत्रांततताचयेति ब्रह्मन्नक्तेः ॥ संनिकर्षेपि कर्तव्यं त्रिगोत्रात्परतो यदि ते
देवलोक्तेः श्रेनि ॥ एतच्च दाक्षिणात्या न मन्यंते यत्तु वशिष्ठः ॥ पंचमीं सप्तमीं चैव मातृतः
पितृतस्तथेति ॥ यच्च विष्णुपुराणे ॥ पंचमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीं ॥ गृह
स्थ उद्वहेत्कन्यां न्यायेन विधिना नृप इति ॥ तत्पंचमी सप्तमी मतीतेति रव्येयं ॥ पंचमे सप्त
मे चैव येषां वैवाहिकी क्रिया ॥ क्रियापरा अपि हि ते पतिताः शूद्रतां गता इति पराशरमरीची
वचनात् ॥ हारलतापारिजातवलिखितो ॥ असपिंडातु सर्वेषां गोत्रतः सा सप्तपौरुषी ॥ पिंड

श्चोदकदानं च आशौचं च तदानुगतं॥ गोत्रसंतानं॥ आशौचं तानभिव्याप्य गच्छतीत्यर्थः॥
शुद्धिविवेके शुद्धिचिंतामणौ च ब्रा[illegible]ह्मे॥ सर्वेषामेव वर्णानां विज्ञेया साप्तपौरुषी॥ सपिं
डता ततः पश्चात्समानोदकसंततिः॥ ततः कालवशात्तत्र विस्मृतौ नामगोत्रतः॥ समानो
दकसंज्ञा तु नावस्मा[illegible]प्तिनश्यति॥ सप्तमोर्ध्वं त्रय सोदकास्ततो गोत्रजाः॥ ब्राह्मे॥ अ
विभक्तधनास्ते तु सपिंडाः परिकीर्तिताः॥ तेन विभक्तधनाभावे विभक्तः सपिंडो धनहरि
नान्यथेत्यर्थः॥ तेन विवाहे आशौचे धनग्रहणे च त्रिधा सापिंड्यं सिद्धं॥ यत्तु पंचमीं मात्
तः परिहरेत्सप्तमीं पितृतस्त्रीन्मातृतः पंच पितृतो वेति पैठीनसी स्मृतेः॥ त्रिनिसनुकल्प
इति माधवोक्तेः॥ पंचमी सप्तमी चैव मातृतः पितृतस्तथेति॥ दशभिः पुरुषैः ख्यातात् श्रोत्रि
याणां माहाकुलात्॥ उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीं॥ पंचमीं तदभावे तु पितृपक्षे पव
विधिः॥ सप्तमी चैव तथा षष्ठी पंचमी च तथैव च॥ एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः॥
त्ता पा चा चतुर्थश्चा पक्षयोरुभयोरपि॥ विवाहयेन्मनुः प्राह पाराशर्यो गिरादयः॥ प्रसुते
शानुतत्पेएकुलमार्गेण चोद्वहेत्॥ निषिद्धं व्यवहारोर्चस्याद्दे दोदैतन्न दृश्यते इति चतुर्विंशति
मतात्॥ चतुर्थमुद्वहेत्कन्यां चतुर्थः पंचमो पिवा॥ पाराशरमते॥ षष्ठीं पंचमो न तु पंचमी
ति पराशरोक्तेः श्चातुकल्से हे नायदि पंचम्यादिपरिणयनं॥ कार्यमिति प्रतिपत्ते॥ अत्र हि तत
दभावे इति स्पष्टमेवानुकल्पत्वमुक्तं॥ तन्नपयाश्रुतत्वेयं॥ इत्यौ जमरीचौ वचोविरोधात्॥
वस्तुनि विकल्पासंभवात्॥ पंचमात्सप्तमाद्विमायः कन्यामुद्वहेद्द्विजः॥ गुरुतल्पी स विज्ञेयः

सगोत्रां चैव मुद्वहेदिति विज्ञाने:॥ पाराशरस्य मूलमाधवाचार्य॥ तस्यान्मदनपारिजाताद्युक्त
दिशा दत्तकस्यापत्यसंबंधाधन्तुमवेशान्ब्राह्मणादीनां सपिंडविषये वा पूर्वोक्तानि शेषाणि॥
ननु कल्प इति भ्रमितव्यं॥ यत्तु स्मृतिचंद्रिका माधवाचार्य आह॥ तृतीयेसंगच्छावहा इति शातप
थोक्तेः॥ तृतीयां वा सुहृन्मातुलस्यैव योषा भागस्ते पैतृष्वसेयी वपामिवेति गोभिलनो जनिताः दंपतीक
राविति मंत्रवर्णात्॥ मातृष्वसासुता नैके चैव पितृष्वसासुतास्तथा॥ विवाहं लिबं चिदं देशेसंको चापिस
पिंडतामिति शातातपोक्तेश्च मातुलकन्ययोर्विवाहः कार्यः॥ यद्यपि पितृष्वसृकन्योद्वाहो पि शास्त्र तथा
प्यस्वर्ग्यं लोकविद्विष्टामित्यादि निषेधाद्व्यनानंतरेणतदुद्वाहस्याविधानाच्चनः कार्यः॥ अयत्तु दाक्षि
णात्यस्य शिष्टाचारात्कार्य इति॥ न च पूर्वोक्तश्रुतीनामर्थवादमात्रता॥ माधवाचार्येण सिद्धेः॥ उपरोदिह
देवेभ्यो धारयंती तिवदर्थवादात्तुपपत्तौ विधिकल्पनात्॥ यत्तु शातातपः॥ मातुलस्य सुतामूढ्वा
मातृगोत्रां तथैव च॥ समानप्रवरांचैव द्विजश्चांद्रायणं चरेत्॥ यच्च मनुः॥ पैतृष्वसेयी भगिनीं
स्वस्रीयां मातुरेव च॥ मातुश्च भ्रातुराप्तस्य गत्वा चांद्रायणं चरेत्॥ एतास्तिस्रस्तु भार्यार्थे नो
पयच्छेत्तु बुद्धिमान्॥ यच्च व्यासः॥ मातुः सपिंडा यत्नेन वर्ज्या द्विजातिभिरिति॥ तत्संधर्वादिविवा
हविषयं॥ तन्मातृपितृगोत्रानिवृत्ते॥ अतएव मार्कंडेयपुराणे॥ गांधर्वादिविवाहेषु पितृगोत्रेण धर्म
विदिति॥ ब्राह्मादिविवाहे तु परिणेयैवेति॥ मदनरामेश्वरोपि तृतीयेध्याये वाक्यपदे॥ मातुलक
न्योद्वाहस्तु दाक्षिणात्यस्मृतिविधानाचारप्राप्तस्यास्य वार्तिके बाधोक्ता वती पितृवो ज्ञश्रोतलिंगव
यस्तादस्य कर्तव्यतामाह॥ तदेव दत्तकस्यपालकदत्रिममातृसोदरकन्याविषयत्वेनासवर्णवर्ण
मातुलकन्याविषयत्वे तु गोत्रांतरपरत्वेन चापपन्नमप्यविचारितरमणीयं यथा तथास्तु॥

धापि कलौ तावन्निषिद्धमेव॥ गोत्रान्मातुः सपिंडाच्च विवाहो गोवधस्तथेत्यादिस्मृत्यन्तरात्॥ माधवी
ये बौधायनोप्युपन्यस्य निरासमाह॥ पंचधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतस्तद्दक्षिणापि क्रियये नुपेतेनाशी
या सह भोजनं पर्युषितभोजनं मातुलपितृस्वसृदुहितृपरिणयमिति॥ परिसाधनमिति
अथोत्तरतः सिंधुपानादिषु नेतर इतरस्मिन्कुर्वन्दुष्यतीतरस्मिन्निति॥ भट्टसोमेश्व
रेणापि स्मृतिविरुद्धानां मातुलकन्यादादीनां तस्माद्वचनादप्रामाण्यमित्युक्तं॥ बृहस्प
तिरपि॥ उद्वह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः॥ तस्मादाद्यनराः दुष्टैर्न्याभिचाररताश्चि
यः॥ उत्तरे मद्यपाश्चैव स्पृश्यान्त्यगारजश्वलाङ्गतिनाचारसमाह॥ अतएव हेमाद्रिमाधवे॥
कर्णरकादानां तत्कारिणं श्राद्धे निषिद्धः॥ बोपदेवेनापि लिखितं॥ श्राद्धे॥ अत्र मातुलजो
द्वाहि पश्चैव वृषलीपतिः॥ श्राद्धे नागच्छेत्तद्धि मावृतं यच्च निरामिषमिति॥ तस्मान्मातृतः पं
च पितृतः ससप्तमकोद्वहेदिति सिद्धं॥ संबंधविवेके सुमंतुः॥ श्राद्ध नामैकपाठे विच्छिन्ना
रं न्यथापिंडाशौचमियाविच्छेदात्सहतुल्यो भवति॥ अस्यार्थमाह शूलपाणिः॥ जीवति
श्रादिशिकस्य वृद्धप्रपितामहादयस्त्रयः श्राद्धदेवतास्तापिंडभाजो भवंति॥ तदूर्ध्वं त्रयो नवपु
रुषपर्यंता लेपभाजः॥ श्राद्धकर्ता च दशम इति दशमादूर्ध्वं सापिंड्यनिवृत्तिः॥ दशमादित्यु
पलक्षणं॥ तेन पितृपितामहजीवने नवपुरुषपर्यंतं पितृजीवने चाष्टपर्यंतं सापिंड्यमिति
ज्ञेयं॥ अत्र धनग्रहणे संनिहिताभावे सप्तपुरुषपर्यंतमधिकारः॥ धनग्राहित्वमात्रस्य:स्त
नायः पौत्रतदूर्ध्वं श्राद्धविच्छेदः॥ अथ धनहारि तेषुत्र श्राद्धाधिकारिणे ब्रह्म हेमर्यः॥ आत्मत
यादि सन्तत्यन्यविषयं॥ अत्र महानां पुंस्त्रियोर्णां तु त्रिपुरुषपर्यंतायन इति वासिष्ठोक्तेः॥ एत

ख्यातो चेद्विषयं सापिंड्यं न तु विवाहादौ ॥ तत्र पूर्वोक्तवचनैः पंचमसप्तमत्वनियमादिति मे
धातिथिप्रमुखा दाक्षिणात्याः ॥ वाग्दानोत्तमेतदिति स्मृतिविवेकः ॥ मातृकुलविषयं कानिनक
न्याविषयं चेत् ॥ अन्यथा अग्रमत्तानां तथा शास्त्रैर्गणितासापिंड्यं साप्तपौरुषं ॥ अप्रत्तानां प्रवर्
त्तापिंड्यं ॥ महादेवप्रजापतिरिति कौर्म्येण विरोधस्यादिति रत्नाकरस्मृतितत्त्वादि गौडग्रंथाः ॥
तु चैयेव वर्तते ॥ अन्यथा कन्योपत्तौ पुरुषत्रयपर्यंतमेव स्तनकंस्यांतो ध्वंसापत्नमातामहत्तु
लेवामहं त्रितास्सरेल शंखः ॥ यद्यपि जाता बहवः पृथक्क्षेत्राः पृथग्जनाः ॥ एकपिंडाः पृथक्शौचा
पिंडेस्त्वावर्तेने त्रिपु ॥ पृथक्क्षेत्रे भिंन जातीय त्रिपु जाताः पृथग्जनाः ॥ सजातीय भिंन मातृपु
जाताः ॥ अत्र त्रिपुरुषसापिंड्यमिति विरोधे नरवरो व्याचख्यौ ॥ पृथ्वीचंद्रोदये सापिंड्यदी
पित्रायां चैवं ॥ मदनपारिजाते तु पृथक्क्षेत्रमातृभिन्नजाः ॥ पृथग्जना भिन्नजातीयः ॥ एतद्धि
जातीयसापत्नमातृकुलविषयं ॥ सर्वेन एनीनां सापत्नमातृकुले चतुःपुरुषं सापिंड्यं ॥ पंचमी
सप्तमी चैव मातृतः पितृतस्तथेति वसिष्ठोक्तेः ॥ सप्तमामिति ब्राह्मणादीनां क्षत्रियादिदारेस
न्ते पितृकुलविषयं चेत्युक्तं ॥ तत्स्वकपोलकल्पितहार्यथांतरविरोधाच्च निर्मूलं ॥ तस्मात्सान्येव
व्याख्यातत्त्वं ॥ प्रयोगपारिजाते पृथ्वीचंद्रे स्मृतितत्त्वादि गौडग्रंथेषु च सपत्नमातामहकुलपावक्तं ॥ यथा
सुमंतुः ॥ मातृपितृसंबंधो आसप्तमादि विवाह्या भवंति ॥ आपंचमादन्येषां ॥ पितृपत्न्यः
सर्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितृभ्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि
भागिनेयानि अन्यथा संकरकारिणः स्युस्तथाध्यापयितुर्गुरोरेवेति ॥ आपंचमात्पितृमातृ ३०
कुले त्रिगोत्रांतरितविषयं वेति प्राच्याः ॥ मात्स्ये ॥ समानप्रवरांश्चैव शिष्यसंततिरेव च ॥

ब्रह्मदातुर्यशेरेवसंततिः श्रुतिसिध्यते॥ तद्भगिन्योमातृस्वसारइतितुश्राकारेनपठंति॥
हेमाद्रिचन्द्रिकादिविवाह॥ प्रयोगरत्नपारिजाते॥ विरुद्धसंबंधामुपयच्छते॥ तत्रविरुद्धः संबंधः
स्वयमेवोक्तः॥ यथाभार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसाचेति॥ बौधायनः॥ मातुः सप
त्न्याभगिनीतत्सुतांचविवर्जयेत्॥ पितृव्यपत्न्याभगिनीतत्सुतांचविवर्जयेत्॥ अलो
मातृस्वसुः सापत्न्युग्रकन्याप्यविवाह्या॥ सापत्नमातृकुलजामिति मदनपारिजातोक्ते
रितिवैचित्य॥ पितृपत्न्याः सर्वामातरः इत्युक्तेः कास्तुमंतुनातदपत्यापत्यभगिनेया[illegible]नितिलि
एषपक्षनिषेधात् अन्यथासपिंडत्वेनैवनिषेधात् सापत्नमातुलत्वादितिनिर्देशोव्यर्थः॥ अत
एवतेनस्मृतिकौमुद्यां सवर्णसापत्नमातामहकुलत्वेनतत्रैवशंखवचनंव्याख्यातं तेन
वासिष्ठपंचमीसप्तमीमतीत्येतिव्याख्येयं॥ केचित्तु ज्येष्ठभ्रातामातुः समइतिमनूक्तेः
स्वपत्न्यामातृत्वात्तत्स्वसुर्मातामहत्वात् ज्येष्ठभ्रातृपत्नीभगिनीनविवाह्या॥ तथा॥ उत्त
दकब्रह्मदावेर्गिरायाब्रसदः पितेतिमनूक्तेः॥ गुरुणांत्रिपुरुषंसापिंड्यं॥ सर्वोपिनिबो
ध॥ अतस्तेषांकन्यानोद्वाह्याः॥ गायत्र्याउपदेष्टुश्चकन्यानैवोद्वहेद्द्विजः॥ गुरुश्चकन्या
शिष्योवात्सल्यतयापिनष्यते॥ पुरुषत्रयपर्यंतं भ्रातृत्वादेनैतरिष्यते॥ वारसंबंधदूला
नांतुस्मेनसंदेहभागिना॥ विवाहोजनकल्पेयोलोकागर्हीप्रसज्यतइति॥ वचनान्तैरा
द्भुः॥ तत्रमूलंचिंत्यं॥ दत्तविषयोन्यत्र॥ तत्रगौतमः॥ ऊर्ध्वंसप्तमात्पितृबंधुभ्यो बीजि

३१

तथापरार्के पैठीनसिः ॥ त्रिमातृलः पं

नत्र्यमातृबंधुभ्यः पंचमादिति ॥ बंधुग्रहणं नदत्तकमात्रपरीमिदं किंतु संतानोपि एवतु
क्षेत्रजासवर्णव्यामुष्यायणपरीमितरदत्त ॥ अत्र स्मृतिचंद्रिकायां ॥ नियोगाद्युत्पादयतिन
स्मात् द्विजिनोमूर्ध्वं सप्तमादिस्पर्श इति ॥ दत्तकस्य जनकविषयमेतदिति सापिंड्यमिमांसा
यां ॥ तेन दत्तकस्य जनककुलेपंचपौरुषं सापिंड्यं ॥ दत्तमादिपुत्राणां बीजवक्तुः सपिंडता ॥
सप्तमी पंचमी चैव गोत्रेत्वं पालकस्य चेति बृहन्मनुः ॥ वाजिनस्यैति गौतमोक्तेश्च ॥ पाल
कपितृकुले तु पंचपुरुषं पालकमातृकुले त्रिपुरुषं चैवं पितृत्वस्य तत्पानतिरोहितेदिति ॥ ए
तत्सर्वमव्याचरव्यो ॥ दत्तकादिपुत्राः पितृपक्षतो निरुक्तपिंडजा ॥ शार्षेयाश्च सैतद्भ्यते पंच
पितृत्वत इति नान्यान्त्रितिति अस्मादेवग्रंथा ॥ देनजतदकुले सापिंड्यमिति केचिदाहुः ॥ तन्न
सर्वविशेषं पितृत्वयत्तु सापिंड्यमिमांसायां वृद्धगौतमः ॥ स्वगोत्रेषु कृता येषु दत्तक्रियादयः
सुताः ॥ विधिना गोत्रमाप्तायां तेन सापिंड्यं विधीयते ॥ यच्च वसिष्ठः ॥ अन्यशाखोद्भवो दत्तः
पुत्रश्चैवोपनायितः ॥ गोत्रेण स्वशाखोक्तविधिनास्यात्स्वशाखभागिति ॥ यच्च नारदः ॥
धर्मार्थं वर्द्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत् ॥ अंशपिंडविभागिहं तेषु केवलमिति लमिति ॥
तत्सालकुलेप्रासंपौरुषं सापिंड्यं नेष्टेवं परं ग्नतु सर्वथा सापिंड्यं निषेधपरीमिति सापिं
ड्यं मिमांसायां ॥ मदनपारिजातादपि दत्तकास्तु स्ववंशोत्थसापिंड्यं भवति ॥ तथाहि ॥ तेन
त्रिनतिलेसदाहस यस्य मानादत्तपुत्रोमा प्रतिग्रहो ॥ पुत्रीकृता तस्याम निग्रहातु ॥ बेत्रि ३१

ननिस्तलिपिंचपित्वनइतितु यस्य दत्तपुत्राः पिता नास्य दत्तस्य यज्जनककुलं तद्विषयमिदमुक्तं ॥ वस्तुत
स्तु पूर्वैश्च सामहानिबंधे पुत्रकास्यानुपलंभादपरार्कादिलिखितनाभावात्पूर्वोक्तव्यवस्थायाश्च प्र
तिपन्नत्वान्नतुल्यैबोधेरतं लिखितं तेषामेव शोभते ॥ श्रीमन्मासादिनुसवर्णसापत्नमातृकुलपरं ॥
यथैवजातकहवयइति ॥ रौरवे कश्यपादिमनुपालककुले एकपिंडदानक्रियालोपे तद्रूपं स्यात
पौरुषमेवसापिंड्यं बाजिज्ञ्यैति गौतमोक्तेर्जनककुले पिता च देवेतियुक्तं प्रतिभाति ॥ अत एवा
स्यद्व्यामुष्यायणत्वं हेमाद्रिः प्रवरमंजर्यां वृत्तिकृत नारायणभट्टोक्तेः ॥ भट्टसोमेश्वरलाभिप्या
या कुंतोभोजस्य पालककन्याले पितृर्ध्व सप्तमात्पितृबंधुभ्यो बीजिनश्चेति गौतमोक्तर्द्वि मा
या पश्यायाः जनकस्य भ्रूरसेनस्य कुले पितसप्तपौरुषं पालकस्य कुले पितामहदेवसापिंड्यमुक्तम
पिकाकारणायहलेरसम्प ॥ सापिंड्यदीपिकायां तु दत्तकक्रियादीनां जनकगोत्रेलोपनयने व्
तेक जनककुले सप्तपौरुषं सापिंड्यं पालककमाला पितृकुले त्रिपुरुषं ॥ पिंडनिर्वपानि वांच्य
लक्षणं त्रिपुरुषं सापिंड्यं ॥ पालकगोत्रेलोपनयने सतेलत्कुले सप्तपौरुषमित्युक्तं ॥ तंत्र
स्तु उपनयनसंस्कारा निजगोत्रेण वै कृताः ॥ दत्ताद्यास्तनयास्तेस्युरन्यथा दास उच्यते इ
ति कालिकापुराणे तु उपनयनोत्तरं दत्तकनिषेधात् ॥ त्रिपुरुषमित्यपि मूलमन्वेषणीयमित्यलं बहु
ना ॥ मातापितृद्वारकसापिंड्यं पंचानां कन्यानां इयं संख्या ॥ रामवाजपेयिनोक्तः ॥ ७ द्वैदपि
तरौ पितृश्च पितरौ तज्जन्म वदं पत्नी इंद्वतस्य चतुर्थमष्टकमृतो पास्य जन्मासोजशो वंशारं भकद
पत्नी प्रमितिस्त्रियासप्तक्षेत्रदाए वैकाल्पपक्कन्या का पितृकुले सासप्तकृदांशोयो ॥ पद्यप्येकस्य

३२

वहवः सुताः स्युर्नद्यपि तत्तु ॥ संबंधसाम्यादेकैकगणितेस्य वधार्यतां ॥ एकस्मान्मिथुनात्सुतो
यद्गुहितादद्वंद्वद्वयं तद्द्वया ॥ तस्माद्द्वंद्वचतुष्टमष्टतोतः षोडशांतोरदः ॥ यावत्तत्तमद्वंद्वं मागतिस्त
त्ववः कन्यारतेकातये तादंतत्पुलिद्वंद्वचतुष्टमष्टतोरसे स्वकद्दशो षष्टोसपिंडाः पितुः ॥ मातु
र्जन्मदंपती च मिथुनद्वंद्वं तयोः सागरास्तत्स्यापंचमकद्वरमितिरिसेकाचत्तया ॥ पुंस्तु तोद्वंद्वा
द्वंद्वयुगंततोच्चपरंतौष्टौ पंचकद्वंशरद्धोस्यः स्मयुगाः शराश्रौ ॥ विधवो मतुः सपिंडाः
कुले ॥ कुलद्वयस्यकन्यकायुता मिथः सपिंडकाः ॥ हिमांशुद्वग्धराद्दशो विवाहकर्मवर्जिताः
इति ॥ एतच्च सर्ववर्णसाधारणं ॥ सर्वत्र सापिंड्यसद्भावादिति विज्ञानेश्वरोक्तेः ॥ पंचमात्सप्त
माद्रूर्ध्वं मातृतः पितृतः क्रमात् ॥ सपिंडतानिवर्तेत सर्ववर्णेष्वयं विधिरिति ॥ इति नारदवचने
वल्लवचनाच्च ॥ संबंधतत्त्वे सुमंतुः ॥ पितृस्वसृसुतां मातृस्वसृसुतां मातुलसुतां मातृसगोत्रांस
मानार्षेयं विवाह्य चांद्रायणं चरेत् ॥ परिहृत्यैनां मातृवद्बिभृयादिति दिक् ॥ सपरिदमार्षप्रवरः ॥
गोत्रप्रसिद्धं ॥ समाने आर्षे गोयस्य तस्मा ज्जातया न भवंति तं ॥ अथ सपिंडैपगोत्रप्रवर
निर्णयः ॥ ते च भिन्नोनिषेधेनिमित्तं ॥ सगोत्रायदुहितरं न प्रयच्छेदितापस्तंबोक्तेः ॥ असमानप्र
वरैर्विवाह इति गौतमोक्तेश्च ॥ तत्र गोत्रलक्षणमाहाश्वरमंजर्यां बौधायनः ॥ विश्वामित्रो
जमदग्निर्भरद्वाजोथ गौतमः ॥ अत्रिर्वसिष्ठः कश्यप इत्येते सप्तर्षयः ॥ सप्तानांमृषीणामग
स्त्याष्टमानां यदपत्यं तद्गोत्रं ॥ यदपि केवलभार्गवो ष्टिषेणादिषु केवलांगिरसेषु च गौतमा
दिषु नैतत् ॥ भृग्वंगिरसोः रुक्तेषु नंतर्गतेः ॥ यथाप्यत्रेरष्टापत्तिरेवोतिकेचित् ॥ अत एव स्मृ

३२

एकस्य द्व्यस्यनेयत्र नद्दोषस्तत्र कथ्यते॥ अंगिरोगणेगौतमभरद्वाजे॥ पंचा
नांत्रिषुसामान्यादविवाहस्त्रिषु द्वयोः॥ अंगिरोगणेष्वेवशेषेष्वेकेपिवारयेत्॥ ६

सर्वथसारे प्रवरैक्यादेवमाविवाह उक्तः॥ यद्यपिवसिष्ठादीनांनगोत्रैक्यमुक्तं॥ अनएवपूर्वेषांचैतन्मतं अत्र विशेषोस्मत्कृतेप्रवरदर्पणेज्ञेयः॥ प्रवरास्तुप्रवराणानिप्रवराः॥ तच्चप्रवरणं यद्यपिगोत्रप्रतस्यापिक्वचिद्दृश्यतेनतथापिसर्वत्रदृष्टमिसिद्धेर्द्रष्टव्यः॥ अन्यथातेषांआर्षेयपयेकार्षेयद्व्यादिनिर्देशानुपपत्ते अन्यत्तुतद्गोत्राणां आर्षेयइतिभेदमाहुरित्युक्तं॥ तत्त्वंतुगोत्रप्रवृत्तस्यपितृपितामहप्रपितामहएवप्रवराः विलेनायेयप्रपौत्रइतिशालपक्षस्मृतेः॥ परंपरप्रथममिलाश्वलायनेः॥ अत्र विशेषमाहबौधायनः॥ एकएवऋषिर्यावत्प्रवरेष्वनुवर्तते॥ तावत्समानगोत्रत्वमन्यत्र अंगिरसांगणादिति॥ स्मृत्यर्थसारे॥ व्रियमाणतयावापिसतयावानुवर्तते॥ शेषोप्येषु एकोपिसमानप्रवरोविवाहंवारयेदित्यर्थः॥ बौधायनोपि अंगिरसवर्जीत्युक्तं॥ व्यार्षेयःसंनिपातेष्वविवाहःत्र्यार्षेयाणांदेवेष्टगावःसप्तअंगिरसषोडशश्त्र्यय स्ववहारः कश्यपस्त्रयः वसिष्ठास्त्ववहारःविश्वामित्रंदशअगस्त्यःपंचैतिएवोनपंचाशत्॥ आर्षेयःसंनिपातेविवाहःपंचार्षेयाणामिति॥ अंगिरोगणेष्वपिजमदग्निगोतमभरद्वाजेष्वेकप्रवरसाम्येसर्वेषामन्यप्यसाम्येवासगोत्रत्वादेवाविवाहइतिदिक्॥ अथगोत्राणिप्रवराश्चोच्यन्ते॥ तत्रबौधायनः॥ गोत्राणांतुसहस्राणिप्रयुतान्यर्बुदानिच॥ ऊनपंचाशदेवैषांप्रवराऋषिदर्शनात्॥ तत्रादौभृगवः॥ वत्साविदार्ष्टिषेणायस्कामिमथुवीवैन्याश्शुनकाइति॥ वत्सानांभार्गवच्यवनाप्नवानौर्वजामदग्न्येतिभार्गवौर्वजामदग्न्यवेभार्गवच्यावनाप्नवानेतिवागोविदानांपंच॥ भार्गवच्यवनाप्नवानौर्वश्चेदेति॥ भार्गवौर्वजामदग्न्येतिवा॥ एतौद्वौजामदग्न्यसदृशौ॥ आर्ष्टि

३३

षेणानां भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति ॥ भार्गवार्ष्टिषेणानूपेति वा ॥ एषां मिथ
णां परस्परमविवाहः ॥ वत्सानां भार्गवच्यावनाप्नवानेति ॥ वत्सपुरोधसयोः पंच भा
र्गवच्यावनाप्नवनवत्सपौरोधसेति ॥ वैजनिवेमथितयोः पंच भार्गवच्यावनाप्नवाव
जवनेमथितेति ॥ एते त्रयः क्वचित् ॥ एषामपि पूर्वैर्विवाहः ॥ अत्र तन्नु [illegible] नारु
षयोन्यश्च विशेषो मस्तलेप्रवरदर्पणे स्थितः ॥ यस्कानां भार्गववैतहव्यसावेदसेति मित्रायु
वां प्रवरो नोक्तः स्त्रिभिः वक्ष्यमाणश्च भार्गववाध्र्यश्वदैवोदासेति ॥ भार्गवच्यावनदैवोदासेति
वा वाध्र्यश्वेति केचित् ॥ वैनान्यां भार्गववैन्यपार्थेति ॥ एते त्रयः स्वैरेयेलाः ॥ शुनकानां शुनके
ति वा ॥ गार्त्समदेति वा ॥ भार्गवगार्त्समदेति द्वौ वा ॥ भार्गवशौनहोत्रगार्त्समदेति त्रयो
वा ॥ वेदविश्वज्योतिषां भार्गववैदवैश्वज्योतिषेति ॥ शाठरमाठराणां भार्गवशाठरमा
ठरेति ॥ एतौ द्वौ क्वचित् ॥ यस्कादीनां स्वगणं सह सर्वैर्विवाहः ॥ तेषु नैकस्य सर्वसारे ॥
यस्कामित्रायुवैन्याः शुनकाः प्रवरैक्यतः ॥ स्वस्वं हित्वा गणं सर्वैर्विवाहस्तु परस्परे ॥ इ
ति ॥ अथांगिरसः ॥ तेषु गौतमा भरद्वाजा केवलांगिरसश्चेति त्रिधा ॥ तत्र गौतमा दश ॥ आ
यास्याः शारद्वताः ॥ कौमण्डाः दीर्घतमसः ॥ औशनसाः ॥ कारेणुपालयः ॥ राहूगणाः ॥
सोमराजकाः ॥ वामदेवाः ॥ बृहदुक्थाश्चेति ॥ तत्र आयास्यानामांगिरसायास्यगौतमे ३३

तिशारद्वतानांमांगिरसगौतमशारद्वतेति॥ कौमंडानांमांगिरसौतथ्यकाक्षिवतगौत
मकौमंडेति॥ आंगिरसायास्यौशिजगौतमकाक्षिवतेतिवा॥ आंगिरसौतथ्यगौ
तमौशिजकाक्षिवतेतिवा॥ आंगिरसगौतमौशिजयस्यौकाक्षिवतेतित्रयोवा॥
दीर्घतमसांगिरसौतथ्यकाक्षिवतगौतमदैर्घतमसेति॥ आंगिरसौतथ्यदैर्घ
तमसेतित्रयोवा॥ औशनसामांगिरसगौतमौशनसेतिवा॥ त्रयः॥ कारेणुपालानां
मांगिरसगौतमकारेणुपालेतित्रयः॥ राहूगणानांमांगिरसराहूगणगौतमेति॥
सोमराजकानांमांगिरससोमराजकगौतमेति॥ वामदेवानांमांगिरसवामदेव्य
गौतमेति॥ बृहदुक्थानांमांगिरसबार्हदुक्थगौतमेति॥ आंगिरसवामदेवबार्ह
दुक्थेति॥ उतथ्यानांमांगिरसौतथ्यगौतमेति॥ रघुनामांगिरसराघुवगौतमेति॥
